# Prabho, Tam Bharatam Raksha

# પ્રભો તં ભારતં રક્ષ

## Document Information

Text title : Prabho, Tam Bharatam Raksha

File name : prabhotaMbhArataMrakSha.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Prabho, Tam Bharatam Raksha

## પ્રભો તં ભારતં રક્ષ

(ગીતિકા)

પ્રભો । દુખાબ્ધિ-સન્ત્રાત ।
 સદેમ ભારતં રક્ષ ।
ક્ષુધા-શોકાગ્નિ-સન્તપ્ત,
 સદેમ ભારતં રક્ષ ॥ પ્રભો૦॥

સદા વિશ્વસ્ય યજ્જ્યોતિ
 સદા યઃ પ્રેરણા-સ્રોતઃ ।
ભુવો માર્ગોપદેષ્ટા યઃ,
 સદા તં ભારતં રક્ષ ॥ પ્રભો૦॥

શ્રુતીનાં યત્ર સન્નાદ
 યતીનાં જ્ઞાન-સંવાદ ।
મુનીના દર્શનોત્કર્ષં
 સદા તં ભારતં રક્ષ ॥ પ્રભો૦॥

ભવે બન્ધુત્વં શિક્ષાયા,
 સદૈવાગ્રેસરો યોઽભૂત્ ।
સદાઽધ્યાત્મોપદેષ્ટા યો
 મુદા તં ભારતં રક્ષ ॥ પ્રભો૦॥

ધરેયં ત્રાસ-સન્ત્રસ્તા
 ક્ષુધા-રોગાઽઽધિ-સન્ધ્વસ્તા ।
અશિક્ષા ધ્વાન્ત-સઙ્ગ્રસ્તા,
 સુધા-વર્ષે સદા રક્ષ ॥ પ્રભો૦॥

સદા યઃ ક્રાન્તિ-દૂતાનાં
 નિનાદૈઃ પૂર્યમાણોઽભૂત્ ।
સદા ક્રાન્તેર્નિનાદેન

સુદેશં ભારતં રક્ષ ॥ પ્રભો૦ ॥

ન શામ્યેત્ ક્રાન્તિ-સન્દેશ
ન રુન્ધ્યાદ્ રાષ્ટ્ર-સન્દેશ ।
ન નશ્યેત્ ચેતનોત્સાહ,
તથૈત ભારતં રક્ષ ॥ પ્રભો૦ ॥

ધરેયં પાવિતા પૂતૈઃ,
સ્વ-રક્તૈઃ ક્રાન્તિદૂતૈસ્તૈઃ ।
યશોમાલા સદા વિન્દેત્,
તથૈત ભારતં રક્ષ ॥ પ્રભો૦ ॥

જ્વલેદ્ વિજ્ઞાન-સઞ્જ્યોતિ
પ્રણશ્યેદાધિ-દુઃખાગ્નિઃ ।
ચરેત્ ક્રાન્તેશ્ચ દાવાગ્નિઃ,
તથૈત ભારતં રક્ષ ॥ પ્રભો૦ ॥

ઋષીણાં, જ્યોતિષાં પૂત ।
હુતાત્મ-ત્યાગ-સમ્પુષ્ટમ્ ।
સુધીનાં કીર્તિ-સૃજુષ્ટ
વરેણ્ય ભારતં રક્ષ ॥ પ્રભો ॥

Proofread by Mandar Mali

*Prabho, Tam Bharatam Raksha*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*